मायैवेति ज्ञायते इति शेषः। चेतसा सर्वं परित्यज्य तत्त्वोदासीन्यं कृत्वा मद्भावनया मदेकभावनया भावितं भुद्धिमान्सन्य यस्त्वता दृष्टे स्वस्थ द्रष्टु परिदृश्या
दिषः प्राह निरामयः सन्सुखीभव। सर्वदुःखनिरस्येति भावः। ततोनुरागामे आनंदमयो मद्रूपो भव। यद्यपि पूर्वमानंदरूपोस्येव तथापि तत्प्राप्तिः वि
न्यामाह

=१ एवंरीत्या स्वोपासकस्य लोकपावनत्वमाह यइति। कदाचायदा कदाचित्यर्थः हृदा निर्मलेनांतःकरणेन यो माम गुणं। मायागुणत्रयरहितं। अल
एव गुणात्परं गुणादिव्याकृतात्परं मायातीतं।मदिवा यद्वेत्यर्थे गुणात्मकं सर्वशक्तत्वलोकोत्तरलावण्यादिगुणवान्मां मामूर्तियस्य तं दृश्यमान्
रूपं सेवते सद्विविधोप्युपासकः अहं मत्स्वरूप एव माम कइत्यर्थो वा।प्रियो हि ज्ञानिनो त्यर्थमहं सच मम प्रियइत्युक्तेः॥ नादृशो मद्भक्तः स्वपादलग्नरे

रा·उ·५
२४

चेतसा मद्भावनाभावितशुद्धमानसः सुखीभवानंदमयो निरामयः ६० यः से
वेत मामगुणं गुणात्परं हृदा कदा वा यदि वा गुणात्मकं सोहं स्वपादांचितरेणुभिः
स्पृशन्पुनाति लोकत्रितयं यथा रविः ६१ विज्ञानमेतदखिलं श्रुतिसारमेकं वे
दांतवेद्यचरणेन मयेव गीतं यः श्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि
मद्वचनेषु भक्तिः ६२ ॥इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे राम
गीता नाम पंचमः सर्गः ५ एकदा मुनयः सर्वे यमुनातीरवासिनः आजग्मू
राघवं द्रष्टुं भयाल्लवणरक्षसः १ कृत्वाग्रे तु मुनिश्रेष्ठं भार्गवं च्यवनं द्विजाः अ
संख्याताः समायाता रामादभयकांक्षिणः २ तान्पूजयित्वा परया भक्त्या रघुकु
लोत्तमः उवाच मधुरं वाक्यं हर्षयन्मुनिमंडलं ३ करवाणि मुनिश्रेष्ठाः किमा

=३ इति गीतां श्रुतशुद्धमादौ वचनात्समस्याश्वरूपपाठमात्र
गां अं सर्वस्य भेदाज्ञानं उपकारमात्मा देहात्म

x पुनाति: स्पृशल्लोकत्रयं पुनाति। अज्ञा
x नृपातन्ति रूपितेन पावनीकरोति। सूर्यः यथार
x विः स्पर्शैः स्पृशन्ताज्ञा दिविकिरी का
२८ x तिलकमा॥१=

फलमाह विज्ञानमिति। विज्ञानजनकं करणं च्युतसत्ता। वेदांतैरुपनिषद्भिर्वेद्यं चरणं जगज्जन्मादिलक्ष
णं यस्य तेन कथमित्याशंक्य भवसे केति सूचयन्नत्र हेतुमाह मद्वचनेषु भक्तिः विश्वासो यदीत्यर्थः॥ गुरुवाक्यविश्वासस्यैव फलं
=१ भव कार्यइति शेषः॥ आगमनस्य च किं कारणं १ दक्षिणी व्यावर्तिना भावः॥

यत्नमस्मात्प्रीसा मां द्रष्टुमागता स्त कृत्योस्मि।

गमनकारणं धन्योस्मियदियूयंमांप्रीत्याद्रष्टुमिहागताः ४ सुदुष्करंचयत्कार्यंभ
वतां तत्करोम्यहं आज्ञापयंतुमांभस्यंब्रह्मणदैवतंहिमे ५ तच्छ्रुत्वासहसाह
ष्टश्च्यवनोवाक्यमब्रवीत् मधुनामामहादैत्यः पुराकृतयुगेविभो ६ आसीद्
तीवधर्मात्मादेवब्राह्मणपूजकः तस्यतुष्टोमहादेवोददौशूलमनुत्तमं ७ प्रा
हचानेनयं हंसिसतुभस्मीभविष्यति रावणस्यानुजाभार्यातस्यकुंभीनसीश्रुता
८ तस्यांतुलवणोनामराक्षसोभीमविक्रमः आसीद्दुरात्मादुर्धर्षोदेवब्राह्म
णहिंसकः ९ पीडितास्तेनराजेंद्रवयंत्वांशरणंगताः तच्छ्रुत्वाराघवोप्याहमा
भैर्वोमुनिपुंगवाः १० लवणंनामयिष्यामिगच्छंतुविगतज्वराः इत्युक्त्वाप्राहरा
मोपिभ्रातॄंकोवाहनिष्यति ११ लवणंराक्षसंदघात्ब्राह्मणेभ्योऽभयं
त्र

रा॰उ॰६
२५

महत् तच्छ्रुत्वा प्रांजलिः प्राह भरतो राघवाय वै १२ अहमेव हनिष्यामि देवा
ज्ञापय मां प्रभो ततो रामं नमस्कृत्य शत्रुघ्नो वाक्यमब्रवीत् १३ लक्ष्मणेन
महत्कार्यं कृतं राघव संयुगे न दित्यामे महाबुद्धिर्नरतोऽदुःखमन्वभूत् १४
अहमेव गमिष्यामि लवणस्य वधाय च त्वत्प्रसादाद्रघुश्रेष्ठ हन्यां तं राक्षसं
युधि १५ तत् श्रुत्वा स्वांकमारोप्य शत्रुघ्नं शत्रुसूदनः प्राहाद्यैवाभिषेक्ष्या

हेतौ पंचमी ४ =
मि मथुराराज्यकारणात् १६ आनाय्य च सुसंभारान् लक्ष्मणेनाभिषेचने ४ = अभिषेचन निमित्तं विषयसप्तम्यामयमर्थः फलति। ४ =
अनिच्छंतमपि स्नेहादभिषेकमकारयत् १७ दत्वा तस्मै शरं दिव्यं रामः
शत्रुघ्नमब्रवीत् अनेन जहि बाणेन लवणं लोककंटकं १८ स तु संपूज्य
तच्छूलं गेहे गच्छति काननं भक्षणार्थं तु जंतूनां नानाप्राणिवधाय च १९
३ वसिष्ठादिभिरितिशेषः।

२५

=१ स तु यावद्वनचरो भवेन्न भवति सदनं नायाति तावद्देवे स्तव्यथः।

स तु नायाति सदनं यावद्वनचरो भवेत् तावद्देवपुरद्वारि तिष्ठ त्वं धृतकार्मु
कः २० यो त्यसे सत्वयाक्रुद्धस्तदावध्यो भविष्यति तं हत्वा लवणं क्रूरं तद्वनं
मधुसंज्ञितं २१ निवेश्य नगरं तत्र तिष्ठ त्वं मेनुशासनात् अश्वानां पंच
साहस्रं रथानां च तदर्द्धकं २२ गजानां षट्शतानीह पतीनामयुतत्रयं आ
त्वमग्रे प्रथममेक ऽ एव राक्षसं साधय ५ गमिष्यति पश्चात्त्वमग्रे साधय राक्षसं २३ इत्युक्त्वा मूर्ध्न्यवघ्राय प्रेषया
मास राघवः शत्रुघ्नं मुनिभिः सार्धमाशीर्भिरभिनंद्य च २४ शत्रुघ्नोपि त
था चक्रे यथा रामेण चोदितः हत्वा मधुसुतं युद्धे मधुरामकरोत्पुरीं २५
समृद्धां जनतया सस्यां सभूतां २ स्फीतां जनपदां चक्रे मधुरां दानमानतः सीतापि सुषुवे पुत्रौ द्वौ वाल्मीके
राश्रमे २६ मुनिस्तयोर्नाम चक्रे कुशो ज्येष्ठोऽनुजे लवः क्रमेण विद्या

रा॰ उ॰ ६ संपन्नौ सीतापुत्रौ बभूवतुः २७ उपनीतौ च मुनिना वेदाध्ययनतत्परौ कृत्स्नं
रामायणं प्राह काव्यं बालकयोर्मुनिः २८ शंकरेण पुरा प्रोक्तं पार्वत्यै पुरहा
२६ वेदस्तात्पर्यार्थेस्तान ग्रिमिस्तं। रिणा वेदोपबृंहणार्थाय तावग्राहयत प्रभुः २९ कुमारौ स्वरसंपन्नौ सुंद
रौ चाश्विनाविव तंत्रीतालसमायुक्तौ गायंतौ चेरतुर्वने ३० तत्र तत्र मुनी
नां तौ समाजे सुररूपिणौ गायंतौ वम्भितौ दृष्ट्वा विस्मिता मुनयोऽब्रुवन् ३१
गंधर्वेष्विह किंनरेषु भुवि वा देवेषु देवालये पातालेष्वथ वा चतुर्मुखगृहे लो
केषु सर्वेषु च अस्माभिश्चिरजीविभिश्चिरतरं दृष्टा दिशः सर्वतो नाज्ञायी
दृग्गीतवाद्यगरिमा नादर्शि नाश्रावि च ३२ एवं स्तुवद्भिरखिलैर्मुनिभिः २६
प्रतिवासरं आसाते सुखमेकांते वाल्मीकेराश्रमे चिरं ३३ अथ रामोऽश्व
=२ नाज्ञायी सस्येव विवरणं मादर्शीति। साक्षाद्दृशं गानं न श्रुतमित्यर्थः। नाश्रावि। कर्णोपकर्णिकया मुखदेशे ईदृशं विक्षि
गानात् स्वी किंतलग्रुत्माग्रमोर्थः।

मेधादींश्च कार बहुदक्षिणान् यज्ञान्स्वर्णमयीं सीतां विधाय विपुलद्युतिः
२४ तस्मिन्विताने ऋषयः सर्वे राजर्षयस्तथा ब्राह्मणाः क्षत्रिया वैश्याः
समाजग्मुर्दिदृक्षवः २५ वाल्मीकिरपि संगृह्य गायंतौ तौ कुशीलवौ जगा
मऋषिवाटस्य समीपं मुनिपुंगवः २६ तत्रैकांते स्थितं शांतं समाधिविर
मे मुनिं कुशः पप्रछ वाल्मीकिं ज्ञानतत्त्वकथांतरे २७ भगवन् श्रोतुमि
छामि संक्षेपाद्भवतोखिलं देहिनः संसृतिर्बंधः कथमुत्पद्यते दृढः २८ क
संसृतिरूपो बंधः
थं विमुच्यते देही दृढबंधाद्भवाभिधान् वक्तुमर्हसि सर्वज्ञ मह्यं शिष्याय ते मु
ने २९ वाल्मीकिरुवाच शृणु वक्ष्यामि ते सर्वं संक्षेपाद्बंधमोक्षयोः स्वरूपं
साधनं चापि मत्तः श्रुत्वा यथोदितं ४० तथैवाचर भद्रं ते जीवन्मुक्तो भवि

=५ कुशः पप्रछु इति वियोगात्कात्स्य स्य मं जिहिरत्वा यामि उधर्तत्वं पप्रछेति भावः।

=१ वस्तुतो देहरहितस्य चिदात्मनः देहो महागेहमेव यथा गृहस्वामिनो गृहेण न तादात्म्यं तस्यैवं चिदात्मनो देहेनापि न तदिति भावः।
=१ तस्मिन्नस्मिन्देहेऽहंकार एव मंत्री। स च तेनैव कल्पितः स तस्याधिष्ठाने मायाया रूपः परिणामः इति तेनैव कल्पित इत्युक्तं। सः स्वं स्वकीयं देहरूपं गेहं स्वविषयमहंकारं ममेत्याकारं चाभिमानं चिदात्मन्यारोप्य
अहंकारः

ए॰ उ॰ ६ व्यापि देहे एव महागेहम देहस्य चिदात्मनः ४१ तस्याहंकार एवास्मिन्मंत्री तेनैव
२७ कल्पितः देहगेहाभिमानं स्वं समारोप्य चिदात्मनि ४२ तेन तादात्म्यमापन्नः अहंकारः
स्वचेष्टितमशेषतः विदधाति चिदानंदे तद्भासितवपुः स्वयं ४३ तेन संकल्पि
तो देही संकल्पनिगडावृतः पुत्रदारगृहादीनि संकल्पयति चानिशं ४४ संकल्प
यन्स्वयं देही परिशोचति सर्वदा त्रयस्तस्याहमो देहा अधमोत्तममध्यमाः
४५ तमः सत्वरजः संज्ञा जगतः कारणं स्थितेः तमोरूपो हि संकल्पो नित्यं
तामसचेष्टया ४६ अत्यंतं तामसो भूत्वा कृमिकीटत्वमाप्नुयात् सत्वरूपो हि
संकल्पो धर्मज्ञानपरायणः ४७ अदूरमोक्षसाम्राज्यः सुखरूपो हि तिष्ठति
रजोरूपो हि संकल्पो लोकसव्यवहारवान् ४८ परितिष्ठति संसारे पुत्रदारानुरं

=३ अनु अऽहंकारस्य कथं चेष्टितमस्य अत आह तद्भासितवपुः तत्संबन्धाद्देवतादृश सामर्थ्यवानयं जात इत्य।
=३ तेन संकल्पितः तेनाहंकारेण स्वीयसंकल्पेनैव तद्वान्कृतः अत्यंतसन्निकर्षेण तादात्म्यापन्नत्वात् संकल्पयति कामयते
२८

=४ संकल्पयन्निति। तस्याहमोऽहंकारस्य त्रयो देहाः। तदेवाह तमः सत्वेति। जगतः स्थितेः कारणं। तेषां कार्यविशेषमाह तमोरूपादित्यादि। कारणानुरूपत्वात्कार्यस्य तत्कृतचेष्टाया तामसत्वं। एवं सत्वरूप इत्यादिष्वप्यारव्येयं। तत्कार्यं धर्मेत्यादि। यस्यायं संकल्पः स धर्मादिविशिष्टो भवे मोक्षोऽप्यनयैव वस्याप्राप्य इत्याह अदूरेति। उत एव स सुखरूपस्तिष्ठति हि प्रसि- यस्य रजोरूपः संकल्पः स लोके व्यवहारवान्।

१ = परितिष्ठतीति। तत्त्वधनहारयुतः पुत्राघ नु रुजितः संसारे राज्यसंकल्पकृतकर्मवशात्तिष्ठति। यस्य संकल्पः एतत्पूर्वोक्तं त्रिविधमपि
रूपं परित्यज्य शाम्यतीति शेषः। स परं पदमाप्नोति। सत्त्वरूपसंकल्पस्य हि क्रमेण सर्वसंकल्पनाशद्वारा दूरमोक्षत्वं प्रागुक्तं बोध्यं। आत्मपरि
क्षये आत्मा संकल्पः। अतस्त्वं सर्वा दृष्टीः इंद्रियज्ञानानि परित्यज्य मनसैव मनो नियम्य विषयेभ्यो निवर्त्य। ॥ बाह्येंद्रियविषयसहितो यश्चा
भ्यंतरेंद्रियविषयोर्थस्तस्य तद्विषयस्य संकल्पस्य क्षयं कुरु। संकल्पस्य जे यर्थः। अन्योपायेन तु न सर्वथा सुखप्राप्तिरित्याह यदीति। तादृशं तपः पू

जितः त्रिविधं तु परित्यज्य रूपमेतन्महामते ४९ संकल्पः परमाप्नोति पदमात्मप
रिक्षये दृष्टीः सर्वाः परित्यज्य नियम्य मानसा मनः ५० सबाह्याभ्यंतरार्थस्य संक
ल्पस्य क्षयं कुरु यदि वर्षसहस्राणि तपश्चरसि दारुणं ५१ पातालस्थस्य भूस्थ
स्य स्वर्गस्थस्यापि तेनघ नान्यः कश्चिदुपायोस्ति संकल्पोपशमादृते ५२ अना
बाधेऽविकारे स्वसुखे परमपावने संकल्पोपशमे यत्नं पौरुषेण परं कुरु ५३
संकल्पतंतौ निखिला भावाः प्रोताः किलानघ छिन्ने तंतौ न जानीमः क्व यांति वि
भवाः पराः ५४ निःसंकल्पो यथाप्राप्तव्यवहारपरो भव क्षये संकल्पजालस्य जी
(भावो) वोभ्रसत्त्वमाप्नुयात् ५५ अधिगतपरमार्थतामुपेत्य प्रसभमपास्य विकल्प
जालमुच्चैः अधिगमय पदं तद्द्वितीयं विततसुखाय सुषुप्तचित्तवृत्तिः ५६

=४ संकल्पस्यैव च सर्वाधारत्वात्तन्नाशे एव सर्वविषयनिवृत्तिरित्याह संकल्पतंताविति। विशिष्टो भवः संसारः ये
भ्यस्ते पराः भावाः क्व यांतीति न जानीमः सर्वथा नश्यंत्येवेति भावः। ५४॥ तस्मान्निःसंकल्पस्त्वं केवलं यथा
प्राप्तव्यवहारं कुर्वित्यर्थः। संकल्पक्षयस्य फलमाह क्षय इति। ५५। प्रसभं हठेन विकल्पजालं सम्यक्। अधिगतः

=५ अनाबाधे दुःखासंभिन्ने विकारे विषयसंबंधरहिते च
स्वसुखपरमपावने स्वात्मसुखस्वरूपे ... अन्यः कश्चिदुपा
योस्ति न स्मात् पुरुषप्रयत्नेन ... ॥५३॥

[illegible marginal commentary on right side] ॥५६॥

रा॰उ॰६ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेउत्तरकांडेषष्ठःसर्गः ६
२८ वाल्मीकिनावबोधितोसौकुशःसद्योगतभ्रमः अंतर्मुक्तोबहिःसर्वमनुकुर्वन्नूच २यत्करोतितदनु कुर्वन्निवसर्थः।
चारसः १ वाल्मीकिरपितौप्राहसीतापुत्रौमहाधियौ तत्रतत्रचगायंतौपुरेवी
रा थिषुसर्वतः २ रामस्याग्रेप्रयेतांशुश्रूषुर्यदिराघवः नग्राह्यंवैपुवाभ्यांतद्यदि
किंचित्प्रदास्यति ३ इतितौचोदितौतत्रगायमानौविचेरतुः यथोक्तंऋषि
णापूर्वंतत्रतत्राभ्यगायतां ४ तांसशुश्रावकाकुत्स्थःपूर्वचर्यांततस्ततः
अपूर्वपाठनरीति अपूर्वपाठजातिंचगेयेन(गानेन)समनिपुतां(व्याप्तां) ५ बालयोराघवःश्रुत्वाकौतूहल
मुपेयिवान् अथकर्मान्तरेराजासमाहूयमहामुनीन् ६ राज्ञश्चैवनरव्या २८
घ्रःपंडितांश्चैवनैगमान् पौराणिकान्शब्दविदोयेचवृद्धाद्विजातयः ७
व्याकरणविदः १८

~२ रामं दारकौ च दृष्ट्वा विस्मिताज्ञ पश्यन्ति शेषः

एतान्सर्वान्समाहूय गायकौ संप्रवेशयन् ते सर्वे हृष्टमनसो राजानो ब्राह्म
णादयः ८ रामं तौ दारकौ दृष्ट्वा विस्मिता ह्यनिमेषणाः अवोचन्सर्व एवै
ते परस्परमथागताः ९ इमौ रामस्य सदृशौ बिंबाद्बिंबमिवोदितौ जटिलौ प्रतिबिंबं
यदि न स्यातां न च वल्कलधारिणौ १० विशेषं नाधिगच्छामो राघवस्यान
योस्तदा एवं संवदतां तेषां विस्मितानां परस्परं ११ उपचक्रमतुर्गातुं ता
वुभौ मुनिदारकौ ततः प्रवृत्तं मधुरं गांधर्वमतिमानुषं १२ श्रुत्वा तन्म मनुष्यलोकीय गा
धुरं गीतमपराह्णे रघूत्तमः उवाच भरतं चाभ्यां दीयतामयुतं वसु १३ न मति क्रांत ४ —
दीयमानं सुवर्णं तु न तज्जगृहतुस्तदा किमनेन सुवर्णेन राजन्नौ वन्य
भोजनौ १४ इति संत्यज्य संदत्तं जग्मतुर्मुनिसंनिधिं एवं श्रुत्वा तु
स इति शेषः

रा·उ·७ चरिते रामः स्वस्यैव विस्मितः १५ ज्ञात्वा सीताकुमारौ तौ शत्रुघ्नं चेदमब्रवी
२९ त् हनूमन्तं सुषेणं च बिभीषणमथाङ्गदं १६ भगवन्तं महात्मानं वाल्मीकिं
मुनिसत्तमं आनयध्वं मुनिवरं संसीतं देवसंमितं १७ अस्यास्तु पार्ष
दो मध्ये प्रत्ययं जनकात्मजा करोतु शपथं सर्वे जानन्तु गतकल्मषां १८
सीतां तद्वचनं श्रुत्वा गताः सर्वे तु विस्मिताः ऊचुर्यथोक्तं रामेण वाल्मीकिं
रामपार्षदाः १९ रामस्य हृद्गतं सर्वं ज्ञात्वा वाल्मीकिरब्रवीत् श्वः करिष्यति
वै सीता शपथं जनसंसदि २० योषितां परमं दैवं पतिरेव न संशयः तच्छ्रु रे देवत्वं
त्वा सहसागत्वा सर्वे प्रोचुर्मुनेर्वचः २१ राघवस्यापि रामोपि श्रुत्वा मुनि २९
वचस्तथा राजानो मुनयः सर्वे शृणुध्वमिति चाब्रवीत् २२ सीतापाश्र

=अत्ययं सर्वजनस्य शुद्धत्वनिश्चयो सा इर्फ शपथं करोति स्म नयः =५ इदं पूर्वोक्तयि

२१ सीतायाः शपथं दृष्टुमभ्युपागमंध
र्माधर्मरूपं विज्ञातुं निर्णयन्ति सर्वे।

पथं लोका विज्ञातुं मभ्युपागमं श्रुत्वा तु राघवेणाथ लोकाः सर्वे दिदृक्षवः
२३ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव महर्षयः वानराश्च समाजग्मुः कौ
तूहलसमन्विताः २४ ततो मुनिवरस्तूर्णं ससीतः समुपागमत् अग्रतः
स मृषिं कृत्वा यान्ती किंचिदवाङ्मुखी २५ कृतांजलिर्बाष्पकंठा सीता यज्ञं वि
वेश तं दृष्ट्वा लक्ष्मीमिवायांतीं ब्रह्माणमनुयायिनी २६ वाल्मीकेः पृष्ठतः
सीतां साधुवादो महानभूत् ततो मध्ये जनौघस्य प्रविश्य मुनिपुंगवः
२७ सीतासहायो वाल्मीकिरिति प्राह च राघवं इयं दाशरथे सीता सुव्र
ता धर्मचारिणी २८ अपापा ते पुरा त्यक्ता ममाश्रमसमीपतः लोकाप
वादभीतेन त्वया राम महावने २९ प्रत्ययं दास्यते सीता तदनुज्ञातुमर्हसि॥

=१ अत्रस्थाने कुबेरलिकरुणरसाक्रांतत्तया
स्माविलिपदयोनरुत्तंपनदोषाय।

=२ यथाऽघयावदनृतमुक्तंनस्मरामितथेमौतवपु
त्रकाविति वाक्यमपिसत्यमेवेत्यर्थः।

रा॰उ॰७ इमौतुसीतातनयौइमौयमलजातकौ ३० सुतौतुतवदुर्धर्षौसत्यमेतद्ब्रवीमि
३० ते प्रचेतसोहंदशमः पुत्रोरघुकुलोद्वह ३१ अनृतंनस्मराम्युक्तंयथेमौत
वपुत्रकौ बहून्वर्षगणान्सम्यकृतपश्चर्यामयाकृता ३२ नोपाश्नीयांफलंत
स्यादुष्टेयंयदिमैथिली वाल्मीकिनैवमुक्तस्तुराघवःप्रत्यभाषत ३३ एवमे
तन्महाप्राज्ञयथावदसिसुव्रत प्रत्ययोजनितोमह्यंतववाक्यैरकिल्बिषैः
३४ लंकायामपिदत्तोमेवैदेह्याप्रत्ययोमहान् देवानांपुरतस्तेनमंदिरंसं
३=लोककृतदुर्यशभयात् प्रवेशिता ३५ सेयंलोकभयाद्ब्रह्मन्अपापापिसतीपुरा सीतामयापरित्य पुरेव
क्तानवानूतत्क्षंतुमर्हसि ३६ ममैवजातौजानामिपुत्रावेतौकुशीलवौ शुद्धा ३०
यांजगतीमध्येसीतायांप्रीतिरस्तुमे ३७ देवाःसर्वेपरिज्ञायरामाभिप्रायमु

=२ जगतीमध्येतद्वर्तिनोलोकस्यमध्येशुद्धायांशपथेनसर्वलोकज्ञातशुद्धतायां

स्तुकाः ब्रह्माणमग्रतः कृत्वा समाजग्मुः सहस्रशः ३८ प्रजाः समागमन्हृष्टाः
सीता कौशेयवासिनी उदङ्मुखी ह्यधोदृष्टिः प्रांजलिर्वाक्यमब्रवीत् ३९ रामा
दन्यं यथाहं वै मनसापि न चिंतये तथा मे धरणी देवी विवरं दातुमर्हति ४० =३ प्रवेशगपृच्छि इत्यं मार्गं
तथा शपंत्याः सीतायाः प्रादुरासीन्महाद्भुतं भूतलाद्दिव्यमत्यर्थं सिंहासनम
नुत्तमं ४१ नागेंद्रैर्ध्रियमाणं च दिव्यदेहैर्विप्रभं भूर्देवी जानकीं दोर्भ्यां भूर्देवीति पाठांतरं
गृहीत्वा स्नेहसंयुता ४२ स्वागतं तामुवाचैनामासने संन्यवेशयत् सिंहा =४ दोर्भ्यां गृहीत्वा तां स्वागतमित्युवाचाथ एनां आसने संन्यवेशयत्।
सनस्थां वैदेहीं प्रविशंतीं रसातलं ४३ निरंतरा पुष्पवृष्टिर्दिव्या सीतामवा
पतिता किरत् साधुवादश्च सुमहान्देवानां परमाद्भुतः ४४ ऊचुश्च बहुधा वाचो
अंतरिक्षगताः सुराः अंतरिक्षे च भूमौ च सर्वे स्थावरजंगमाः ४५ वानरा
आसीदिति शे·
=५ सर्वाश्चर्यं तद्दिव्यलोपपादकं रविप्रभमिति।

रा०उ० ७
३१ श्च महाकायाः सीताशपथकारणात् केचिच्चिंतापरास्तस्याः केचिद्ध्यानपरा
यणाः ४६ केचिद्रामं निरीक्षंतः केचित्सीतामचेतसः मुहूर्त्तमात्रं तत्सर्वं तूष्णी
भूतमचेतनं ४७ सीताप्रवेशनं दृष्ट्वा सर्वं संमोहितं जगत् रामस्तु सर्वं ज्ञात्वै
व भविष्यत्कार्यगौरवं ४८ अजानन्निव दुःखेन शुशोच जनकात्मजां ब्रह्म
णा ऋषिभिः सार्धं बोधितो रघुनंदनः ४९ प्रतिबुद्ध इव स्वप्नाच्चकारानंतराः क्रि
याः विससर्ज ऋषीन्सर्वान् ऋत्विजो ये समागताः ५० तान्सर्वान्धनरत्नौघैस्तो
द्वौ इति पाठांतरं षयामास भूरिशः उपादाय कुमारौ तौ अयोध्यामगमत्प्रभुः ५१ तदादि निस्पृ
हो रामः सर्वभोगेषु सर्वदा आत्मचिंतापरो नित्यं एकांते समुपस्थितः ५२ एकां
ते ध्याननिरते एकदा राघवे सति ज्ञात्वा नारायणं साक्षात्कौशल्या प्रियवादि ३१
=१ रामं तच्चरित्रैः ऋषिभिर्वा ज्ञेयैश्च तत्र पापनश्यसाक्षान्नारायणं ज्ञात्वा
=२ एकैकस्मिन्नागते

नी ५३ भक्त्यागत्य प्रसन्नं तं प्रणतः प्राह हृष्टधीः रामत्वं जगतामादिरादिमध्यां
तवर्जितः ५४ परमात्मा परानंदः पूर्णः पुरुषईश्वरः जातोसि मे गर्भगृहे म
म पुण्यातिरेकतः ५५ अवसाने ममाप्यद्य समयो भूद्रघूत्तमं नाद्याप्यबोध
जः कृत्स्नो भवबंधो निवर्तते ५६ इदानीमपि मे ज्ञानं भवबंधनिवर्त्तकं यथा
संक्षेपतो भूयात्तथा बोधय मां विभो ५७ निर्वेदवादिनीमेवं मातरं मातृवत्सलः।
दयालुः प्राह धर्मात्मा जराजर्जरितां शुभां ५८ मार्गास्त्रयो मया प्रोक्ताः पुरा मोक्षा
प्तिसाधकाः कर्मयोगो ज्ञानयोगो भक्तियोगश्च शाश्वतः तेषां तु सुलभो मार्गो भ
क्तियोगः सुपूजितः ५९ भक्तिर्विभिद्यते मातस्त्रिविधा गुणभेदतः स्वभावो य
स्य यस्तेन तस्य भक्तिर्विभिद्यते ६० यस्तु हिंसां समुद्दिश्य दंभं मात्सर्यमेव वा

=१ हिंसा शत्रोः। दंभं पूजालाभादिफलकं। मात्सर्यं परगुणद्वेषः। भेददृष्टिः अ
रिमित्रादिदृष्टिः।१

=५ त्रिविधेतो विषये स्वभावो यस्य तेन या दिनी मी दृशवचनवती म्

=३ स्वस्यावसानेऽन्ते वार्धके इत्यर्थः। तदपि तारूसमाप्तिकाले चास्मयः प्रश्नावसरः। अबोधजः अज्ञानजः कृत्स्नो न निवर्त्तते। सर्वदा त्वत्संगात्किंचिन्निवृत्तोपि सर्वथा न निवर्त्तत इति भावः।

=१ संरंभी तत्तद्विषयकाग्रहवान्

=१ फलाभिसंधिः स्वर्गादिकामः। भोग ऐहिकः। यशः
यशःकामः अर्चादौ प्रतिमादौ आदिना सूर्यादीनां परिग्रहः आत्मानं
भेदबुध्या। अहमुपासको यमुपास्य इति रूपया

रामा०३ भेददृष्टिश्च संरंभी मत्कोमेत्तामसः स्मृतः ६१ फलाभिसंधिर्भोगार्थी धनकामो

३२ यशस्तथा अर्चादौ भेदबुद्ध्या मां पूजयेत्स तु राजसः ६२ परस्मिन्नर्पितं यस्तु

कर्म निर्हरणाय वा कर्तव्यमिति वा कुर्याद्भेदबुद्ध्या स सात्विकः ६३ मद्गुणश्र

वणादेव मय्यनंते गुणालये अविच्छिन्ना मनोवृत्तिर्यथा गंगांबुनोंबुधौ तदेव भ

क्तियोगस्य लक्षणं निर्गुणस्य हि ६४ अहैतुक्यव्यवहिता या भक्तिर्मयि जाय

ते सा मे सालोक्य सामीप्य सार्ष्टि सायुज्यमेव वा ६५ दृदात्यपि न गृह्णंति भक्ता

मत्सेवनं विना स एवात्यंतिको योगो भक्तिमार्गस्य भामिनि ६६ मद्भावं प्राप्नुया

त्तेन अनिक्रम्य गुणत्रयं महता कामहीनेन स्वधर्माचरणेन च ६७ कर्मयो

गेन शस्तेन वर्जितेन विहिंसनं मद्दर्शनस्तुतिमहापूजाभिः स्मृतिवंदनैः ६८

=५ अहैतुक्येति। अहेतुकं फलानुद्देशः। अत एव अव्यवहिता विशेषेणावहिता संबद्धा। सार्ष्टिः सारूप्यं। मत्सेव
नं विना सालोक्यादिशु मत्सेवाभावान्न गृह्णंति नांगीकुर्वंति। स एव। सालोक्यादितिरस्कार एव। आत्यंतिकः
स एव पूर्णः। =२ कर्मयोगमाह। महतेति। विहिंसनं हिंसा वर्जितेन कर्मयोगेन च मद्भावं प्राप्नुयात्।
१ उक्तं भक्तियोग प्राप्त्युपायमाह मद्दर्शेति।

=५वा युना स्वाश्रयापकर्षणात्

न्तेषु मद्भावनया ऽसंगेनासत्यवर्जनैः बहुमानेन महतां दुःखिनामनुकं
पया ६९ स्वसमानेषु मैत्र्या च यमादीनां निषेवया वेदांतवाक्यश्रवणमनना
मानुकीर्त्तनात् ७० सत्संगेनार्जवेणैव ह्यहमः परिवर्जनात् कोस्मयाममधर्मे
स्यपरिशुद्धांतरो जनः ७१ मद्गुणश्रवणादेव याति मामंजसा जनः यथा वायुव अंजसा शीघ्रं मां याति मद्रूपो भवति
शाद्गंधः स्वाश्रयाद्घ्राणमाविशेत् ७२ योगाभ्यासरतं चित्तं एवमात्मानमावि
शेत् सर्वेषु प्राणिजातेषु ह्यहमात्मा व्यवस्थितः ७३ तमज्ञात्वा विमूढात्मा कु
रुते केवलं बहिः क्रियोत्पन्नैर्नैकभेदैर्द्रव्यैर्मेनां बतोषणं ७४ भूतावमानार्चा नि
या मर्चितोहं न पूजितः ७५ तावन्मामर्चयेदेवं प्रतिमादौ स्वकर्मभिः यावत्सर्वे
षु भूतेषु स्थितं चात्मनि न स्मरेत् ७६ यस्तु भेदं प्रकुरुते स्वात्मनश्च परस्य च।

=४ सर्वत्रैव तत्तोहमेवेत्यर्थः।

रा०उ०७ भिन्नदृष्टेर्भयं मृत्युस्तस्य कुर्यान्नसंशयः ७७ मामतः सर्वभूतेषु परिच्छिन्नेषु
३२ संस्थितं एकं ज्ञानेन मानेन मैत्र्याचार्चेदनन्यधीः ७८ चेतसैवानिशं सर्व
भूतानि प्रणमेत्सुधीः ज्ञात्वा मां चेतनं शुद्धं जीवरूपेण संस्थितं ७९ तस्मा
त्कदाचिन्नेक्षेत भेदमीश्वरजीवयोः ८० भक्तियोगो ज्ञानयोगो मया मातरु
दीरितः आलंब्यैकतरं वापि पुरुषः श्राममृच्छति ८१ ततो मां भक्तियोगेन मा
तः सर्वहृदि स्थितं पुत्ररूपेण वा नित्यं स्मृत्वा शांतिमवाप्स्यसि ८२ श्रुत्वा
रामस्य वचनं कौशल्यानंदसंयुता रामं सदा हृदि ध्यात्वा छित्वा संसारबं
धनं ८३ अतिक्रम्य गतीस्तिस्रोप्यवाप परमां गतिं ८४ कैकेयी चापि यो
गं रघुपतिर्गदितं पूर्वमेवाधिगम्य श्रद्धाभक्तिप्रशांतात्मा हृदि रघुतिलकं ३२

भावयंतीशितासुः गत्वा स्वर्गं स्फुरंती दशरथसहिता मोदमाना वनस्थेमा
ना श्रीलक्ष्मणस्याप्यति विमलमतिः प्राप भर्त्तुः समीपं ८५ ॥इतिश्री
मध्यात्मरामायणे उत्तरकांडे मातृणां स्वर्गप्रस्थानो नाम सप्तमः सर्गः
७ श्रीमहादेव उ० अथ काले गते कस्मिन् भरतो भीमविक्रमः युधा
जिता मातुलेन स्वाहूय प्रेषितो गात्ससैनिकः १ रामाज्ञया गत स्तत्र हत्वा गंध
र्वनायकान् तिस्रः कोटीः पुरे द्वे तु निवेश्य रघुनंदनः २ पुष्करं पुष्करा
वत्यां तक्षं तक्षशिलाह्वये अभिषिच्य सुतौ तत्र धनधान्यसुहृद्वृतौ ३
पुनरागत्य भरतो रामसेवापरो भवत् ततः प्रीतो रघुश्रेष्ठो लक्ष्मणं
प्राह सादरं ४ उभौ कुमारौ सौमित्रे गृहीत्वा पश्चिमां दिशं तत्र मल्ला

गंधर्वविषयाधिपतीन्

याहीति शेषः

रा०उ०८ त्विनिर्जित्य दुष्टान्सर्वापकारिणः ५ अंगदश्चित्रकेतुश्च महासत्वपराक्र
३४ मौ द्वयोर्द्वे नगरे रुत्वा गजाश्वधनरत्नके ६ अभिषिच्य सुतौ तत्र शीघ्र
मागत्य मांप्रति: रामस्याज्ञां पुरस्कृत्य गजाश्व बलवाहन: ७ गत्वाहत्वा
रिपून्सर्वान्स्थापयित्वा कुमारकौ सौमित्रिः पुनरागत्य रामसेवापरोभ
वत् ८ तत्तस्तु काले महति प्रयाते रामं सदा धर्मपथे स्थितं हरिं द्रष्टुंस
मागादृषिवेषधारी कालस्ततो लक्ष्मणमित्युवाच ९ निवेदयस्वाति
बलस्य दूतं मां द्रष्टुकामं पुरुषोत्तमाय रामाय विज्ञापनमस्ति तस्य म
हर्षिमुख्यस्य चिराय धीमान् १० तस्य तद्वचनं श्रुत्वा सौमित्रिस्त्वरया ३४
न्वितः आचचक्षेथ रामाय संप्राप्तं तपोधनं ११ एवं ब्रुवंतं प्रोवाच ल

=९ अतिबलस्य महर्षिमुख्यस्य दूतं मां रामाय निवेदयेत्यन्वयः। तस्यां चिराय विज्ञापनमस्ति। चिरं बोधनीयं वाक्यमस्ति।
=१सत्सौमित्रिरित्यन्वयः। रामं प्रति

क्ष्मणं राघवो वचः श्रीमान्प्रवेश्यतां तात मुनिः सत्कारपूर्वकं १२ लक्ष्म
णस्तु तथेत्युक्त्वा प्रावेशयत तापसं स्वतेजसा ज्वलंतं तं घृतसिक्तं यथान
लं १३ सोभिगम्य रघुश्रेष्ठं दीप्यमानः स्वतेजसा मुनिर्मधुरवाक्येन
वर्धस्वेत्याह राघवं १४ तस्मै स मुनये रामः पूजां कृत्वा यथाविधि।
पृष्ट्वानामयमव्यग्रो रामः पृष्टोथ तेन सः १५ दिव्यासने समासीनो
रामः प्रोवाच तापसं यदर्थमागतोसि त्वमिह तत्प्रापयस्व मे १६ वाक्ये
न चोदितस्तेन रामेणाह मुनिर्वचः द्वंद्वमेव प्रयोक्तव्यमनवेक्ष्यं तु तद्व रहस्यं॥ = ...तली येनेति शेषः
चः १७ नान्येन चैतच्छ्रोतव्यं नाख्यातव्यं च कस्यचित् श्रृणुयाद्वा
निरीक्षेद्वा यः स वध्यस्तव प्रभो १८ तथे चेति प्रतिज्ञाय रामो लक्ष्मण

रा·उ·८ मब्रवीत् तिष्ठ त्वं द्वारि सौमित्रे नायात्वत्र जनो रहः १९ यद्यागच्छति कोवापि स वध्यो
३५ मे न संशयः ततः प्राह मुनिं रामो येन वा त्वं विसर्जितः २० यत्ते मनीषितं वाक्यं त
द्वदस्व ममाग्रतः ततः प्राह मुनिर्वाक्यं शृणु राम यथातथं २१ ब्रह्मणा प्रेषितो
स्मीन्द्राकायार्थं तेंतिकं प्रभो अहं हि पूर्वजो देव तव पुत्रः परंतप २२ मायासंगं तदीक्षणमात्रं।
मजो वीर कालः सर्वहरः स्मृतः ब्रह्मा त्वामाह भगवान्सर्वदेवर्षिपूजितः २३
रक्षितुं स्वर्गलोकस्य समयस्ते महामते पुरा त्वमेक एवासीर्लोकान्संहृत्य मां·
मायया तद्रूपया भार्य यया २४ भार्यया सहितस्त्वं मामादौ पुत्रमजीजनः तथा भोगवतं नागमनं नुमभागअर्थः
यासहित इत्यर्थः। तमुदके शायं २५ मायया जनयित्वा त्वं द्वौ ससत्त्वौ महाबलौ मधुकैटभकौ
दैत्यौ हत्वा मेदोस्थिसंचयं २६ इमां पर्वतसंबद्धां मेदिनीं पुरुषर्षभ पद्मेदि ३५

=४ सर्वेस्वपेक्षया पूर्वमहत्तत्त्वस्यैवाप्यमथ विशेषः।

=१ तद्रूपा

=१ निर्मितवानिति शेषः।

=१ तत्रमेदिव्यांसुप्तस्यनाभ्यां विद्यमानेपद्मेमामुत्पाद्येत्यर्थः।

=२ अंगीकृतप्रजोत्पादनादिव्यवहारः

=१ प्रजोत्पादनपालनादिभारं

दिव्यार्कसंकाशे नाभ्यामुत्पाद्यमामपि २७ मांविधायप्रजाध्यक्षंमयिसर्वंन्यवे
दयत् सोहंसंयुक्तसंभारस्त्वामवोचंजगत्पते २८ रक्षांविधत्स्वभूतेभ्योयेमे
मांप्रतितथाप्रतिज्ञातोत्तरमित्यर्थः। वीर्यापहारिणः ततस्त्वंकश्यपाज्जातोविष्णुर्वामनरूपधृक् २९ हृतवानसिभ्र
भारंवधाद्रक्षोगणस्यच सर्वास्त्रूत्सार्यमाणासुप्रजासुधरणीधरः ३० राव
णस्यवधाकांक्षीमर्त्यलोकमुपागतः दशवर्षसहस्राणि दशवर्षशतानि
=४ धासकालप्रतिज्ञा च ३१ कृत्वावासस्यसमयंत्रिदशेष्वात्मनःपुरा सतेमनोरथःपूर्णःपू प्रतिज्ञाविषयःकालः॥४
र्णेचायुषितेनृषु ३२ कालस्तापसरूपेणत्वत्समीपमुपागमं ततोन्यत्र
श्रयतेबुद्धिर्यदिराज्यमुपासितुं ३३ तत्तथाभवभद्रंतेएवमाहपितामहः
यदितेगमनेबुद्धिर्देवलोकंजितेन्द्रियः ३४ सनाथाविष्णुनादेवाभवंतु
=२ नपुनर्लोकेआयुषिपूर्णेसति।

-२सर्वस्यजगतोंऽतकंनाशकंकालमित्यर्थः

रा·उ·८ विगतज्वराः चतुर्मुखस्यतद्वाक्यंश्रुत्वाकालेन भाषितं ३५ हसन्रामस्तदावा
३६ क्यंकृत्स्नस्यांतकमब्रवीत् श्रुतंतववचोमेद्य ममापीष्टतरंतुतत् ३६ संतो
षःपरमोज्ञेयस्त्वदागमनकारणात् त्रयाणामपिलोकानांकार्यार्थंममसंभ
वः ३७ भद्रंतेस्तु गमिष्यामियतएवाहमागतः मनोरथस्तुसंप्राप्तोनमे
त्रास्तिविचारणा ३८ मत्सेवकानांदेवानांसर्वकार्येषुवैमया स्थातव्यंमा
ययापुत्रयथाचाहप्रजापतिः ३९ एवंतयोःकथयतोर्दुर्वासामुनिरभ्यगात्
राजद्वारंराघवस्यदर्शनापेक्षयाद्रुतं ४० मुनिर्लक्ष्मणमासाद्यदुर्वासा
वाक्यमब्रवीत् शीघ्रंदर्शयरामंमेकार्यमेत्यंनमाहितं ४१ तच्छ्रुत्वाप्राहसौ श्राम ३६
मित्रिर्मुनिंज्वलनतेजसं रामेणकार्यंकिंतेद्यकिंतेभीष्टंकरोम्यहं ४२

३आहतमितिपाठांतरं।आहतंयथाभवतितथादर्शनापेक्षयाऽस्यान्वयः।

=२ विभुं रामं न दर्शयसि चेत् सविषयं वंशं दशरथस्येति शेषः। भस्मीकुर्यामित्यर्थः।

राजकार्यांतरे व्यग्रो मुहूर्त्तं संप्रतीक्ष्यतां। तच्छ्रुत्वा क्रोधसंतप्तो मुनिः सौमित्रि
मब्रवीत् ४३ अस्मिन्क्षणे तु सौमित्रे न दर्शयसि चेद्विभुं रामं सविषयं वंशं
भस्मीकुर्यां न संशयः ४४ श्रुत्वा तद्वचनं घोरं ऋषेर्दुर्वाससो भृशं स्वरूपं त
स वाक्यस्य चिंतयित्वा स लक्ष्मणः ४५ सर्वनाशाद्वरं मे घनाशो ह्येकस्य कौ
दुर्वासो रूपाल् रणात् निश्चित्यैवं ततो गत्वा रामाय प्राह लक्ष्मणः ४६ सौमित्रेर्वचनं श्रुत्वा
रामः कालं व्यसर्जयत् शीघ्रं निर्गम्य रामोपि ददर्शात्रेः सुतं मुनिं ४७ रामो
भिवाद्य सुप्रीतो मुनिं पप्रच्छ सादरं किं कार्यं ते करोमीति मुनिमाह रघूत्तमः
४८ तच्छ्रुत्वा रामवचनं दुर्वासा राममब्रवीत् अद्य वर्षसहस्राणामुपवासं
समापितं ४९ अतो भोजनमिच्छामि सिद्धं यत्ते रघूत्तम रामो मुनिवचः श्रुत्वा

=२ वर्षसहस्रसंबंधी य उपवासस्तस्य समापनमित्यर्थः। समास आर्षः।

रा०उ०८ संतोषेण समन्वितः ५० स सिद्धमन्नं मुनये यथावत्समुपाहरत् मुनिर्भु
३८ क्त्वान्नममृतं संतुष्टः पुनरभ्यगात् ५१ स्वमाश्रमं गते तस्मिन्रामः सस्मा
रभाषितं कालेन शोकदुःखार्तो विमनाश्चातिविह्वलः ५२ अवाङ्मुखो दी
नमना न शशाकाभिभाषितुं मनसा लक्ष्मणं ज्ञात्वा हतप्रायं रघूद्वहः ५३ अ
वाङ्मुखो बभूवाथ तूष्णीमेवाखिलेश्वरः ततो रामं विलोक्याह सौमित्रिर्दुःख
संप्लुतं ५४ तूष्णीं त्वं चिंतयंतं गर्हितं स्नेहबंधनं मत्कृते त्यज संतापं जहि
मां रघुनंदन ५५ गतिः कालस्य कलिता पूर्वमेवेदृशी प्रभो त्वयि हीनप्रति इदमवश्यंभावीति भावः।
ज्ञे तु नरको मे ध्रुवं भवेत् ५६ मयि प्रीतिर्यदि भवेद्यद्यनुग्राह्यता तव त्यक्त्वा शं ३८
कां जहि प्राज्ञ मां माधर्मं त्यज प्रभो ५७ सौमित्रिणोक्तं तच्छ्रुत्वा रामश्चलित
= २ मत्कृते त्वत्सन्तिस्ताहानौ ममापि नरक इत्यर्थः।

=४ भूभारहारिणः तावन्मात्रफलकतया धृतशरीरस्य पूर्वं त्वत्तः पूर्वमित्यर्थः। लक्ष्मणगमनं निर्दिष्टं। भावी सत्यर्थोऽस्माभिर्ज्ञात एवास्ति।

मानसः आहूय मंत्रिणः सर्वान्वसिष्ठं चेदमब्रवीत् ५८ मुनेरागमनं यच्च कालस्यापि हि भाषितं प्रतिज्ञामात्मनश्चैव सर्वमावेदयत्प्रभुः ५९ श्रुत्वा रामस्य वचनं मंत्रिणः सपुरोहिताः ऊचुः प्रांजलयः सर्वे राममक्लिष्टकारिणं ६० पूर्वमेव हि निर्दिष्टं तव भूभारहारिणः लक्ष्मणेन वियोगस्ते ज्ञातो विज्ञानचक्षुषा ६१ त्यज त्वं लक्ष्मणं राम मा प्रतिज्ञां त्यज प्रभो प्रतिज्ञाते परित्यक्ते धर्मो भवति =५ प्रतिज्ञाते र्थे परित्यक्ते सतीत्यर्थः।
निष्फलः ६२ धर्मे नष्टेऽखिलं राम त्रैलोक्यं नश्यति ध्रुवं त्वं तु सर्वस्य लोकस्य पालकोऽसि रघूत्तम ६३ त्यक्त्वा लक्ष्मणमेवैकं त्रैलोक्यं त्रातुमर्हसि रामो धमार्थसहितं वाक्यं तेषाम निंदितं ६४ सभामध्ये समाश्रुत्य प्राह सौमित्रिमंजसा पर्येष्टं गच्छ सौमित्रे मा भूद्धर्मस्य संक्षयः ६५ परित्यागो वधो वापि सतां मे वा भयं समं॥
सतामुभयं सममेवेत्यन्वयः। १=

रा·उ·८ एवमुक्तेरघुश्रेष्ठेदुःखव्याकुलितेक्षणः ६६ रामंप्रणम्यसौमित्रिःशीघ्रंगृहमगा
त्स्वकं ततोगत्वासरयूतीरमाचम्यसकृतांजलिः ६७ नवद्वाराणिसंयम्यमूर्ध्निप्रा
३८ णमधारयत् यदक्षरंपरंब्रह्मवासुदेवाख्यमव्ययं ६८ पदंतत्परमंधामचेतसा
सोभ्यचिंतयत् वायुरोधेनसंयुक्तंसर्वेदेवाःसहर्षयः ६९ साग्नयोलक्ष्मणंपुष्पैः
स्तुष्टुवुश्चसमाकिरन् अदृश्यंविबुधैःकैश्चित्सशरीरंसवासवः ७० गृहीत्वाल
क्ष्मणंशक्रःस्वर्गलोकमथागमत् ततोविष्णोश्चतुर्भागंतंदेवंसुरसत्तमाः सर्वे
देवर्षयोदृष्ट्वालक्ष्मणंसमपूजयन् ७१ लक्ष्मणेहिदिवमागतेहर्षोसिद्धलोक हर्यशे
गतयोगिनस्तदा ब्रह्मणासहसमागमन्मुदाद्रष्टुमाहितमहाहिरूपकं ७२
॥इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेउत्तरकांडेअष्टमःसर्गः ८ लक्ष्म ३८
णंतुपरित्यज्यरामोदुःखसमन्वितः मंत्रिणोनैगमांश्चैववसिष्ठंचेदमब्रवीत् १
वणिजः

~४ सत्येन शपे सत्येमेन श्यतु यदि राज्याकांक्षे स एकः शपथः
त्वत्पादयोश्च शपे त्वत्प्रसाद स्पर्शेन च शपे इत्यपरः शपथः    चएवार्थे

अभिषेक्ष्यामि भरतमधिराज्ये महामतिं अद्य चाहं गमिष्यामि लक्ष्मणस्य पदा
नुगः २ एवमुक्ते रघुश्रेष्ठे पौरजानपदास्तदा द्रुमाद्वच्छिन्नमूलादुखार्त्तोऽप
वाचार्थे तिता भुवि ३ मूर्छितो भरतो वापि श्रुत्वा रामाभिभाषितं गर्हयामास राज्यं स
प्राहेदं रामसन्निधौ ४ सत्येन च शपे नाहं त्वां विना दिवि वा भुवि कांक्षे राज्यं
रघुश्रेष्ठ शपे त्वत्पादयोः प्रभो ५ इमौ कुशलवौ राजन् अभिषिंच स्व राघव तर्हि सर्वे गमने कोश
कोशलायां कुशं वीरमुत्तरेषु लवं तथा ६ गच्छंतु दूतास्त्वरितं शत्रुघ्नानयना लपालयिष्यती त्या
य हि अस्माकमेतद्गमनं सर्वो सायम्मणो तु सः ७ भरतेनोदितं श्रुत्वा प शंक्या हममावितिभू~
~२ तथा कथेरं वदंतं तितास्ताः समीक्ष्य तं प्रजाश्च भयसंविग्ना रामविश्लेषकातराः ८ वसिष्ठो
भगवान् राममुवाच सदयं वचः पश्य तात दारात्सर्वाः पतिता भूतले प्रजाः ९

रा॰उ॰१ तासांभावानुगंरामप्रसादंकर्त्तुमर्हसि श्रुत्वावसिष्ठवचनंताःसमुत्थाप्यपूज्य
३९ च १० सस्नेहोरघुनाथस्ताःकिंकरोमीतिचाब्रवीत् ततःप्रांजलयःप्रोचुःप्रजाभ
क्त्यारघूद्वह ११ गंतुमिच्छसियत्रत्वमनुगच्छामहेवयं अस्माकमेषापरमाप्रीतिर्ध
=४अयंवृत्तनुगमनरूपः र्मोयमक्षयः १२ नवानुगमनेरामहृद्गतानोदृढामतिः पुत्रदारादिभिःसार्धम
नुयामोद्यसर्वथा १३ तपोवनेवास्वर्गेवापुरेवारघुनंदन ज्ञात्वातेषांमनोदार्ढ्यंका
लस्यवचनंतथा १४ भक्तिंपौरजनेचैवबाढमित्याहराघवः कृत्वैवंनिश्चयंराम
स्तस्मिन्नेवाहनिप्रभुः १५ प्रस्थापयामासचतौरामनंद्रःकुशीलवौ अष्टौरथ चंद्रइतिपाठांतरं
सहस्राणिसहस्रंचैवदंतिनां १६ षष्टिंचाश्वसहस्राणामेकैकस्मैददौबलं॥ ३९
बहुरत्नौबहुधनौहृष्टपुष्टजनावृतौ अभिवाद्यगतौरामंकृच्छ्रेणानुकुशीलवौ॥

१७ शत्रुघ्नानयने दूतान् प्रेषयामास राघवः ते दूतास्त्वरितं गत्वा शत्रुघ्नाय न्यवे
दयन् १८ कालस्यागमनं पश्चादत्रिपुत्रस्य चेष्टितं लक्ष्मणस्य च निर्याणं प्रति
ज्ञां राघवस्य च १९ पुत्राभिषेचनं चैव सर्वं राममचिकीर्षितं श्रुत्वा तद्दूतवचनं शत्रु
घ्नः कुलनाशनं २० व्यथितोपि धृतिं लब्ध्वा पुत्रावाहूय सत्वरः अभिषिच्य सु
बाहुं वै मथुरायां महाबलः २१ यूपकेतुं च विदिशानगरे शत्रुसूदनः अयो
ध्यां त्वरितं प्रागात्स्वयं रामदिदृक्षया २२ ददर्श च महात्मानं तेजसा ज्वलनप्रभं।
। दुकूलयुगसंवीतं ऋषिभिश्चाक्षयैर्वृतं २३ अभिवाद्य रमानाथं शत्रुघ्नो रघु
पुंगवं प्रांजलिर्धर्मसहितं वाक्यं प्राह महामतिः २४ अभिषिच्य सुतौ तत्र रा पूर्वोक्तयोर्मथुरा
ज्ये राजीवलोचन तवानुगमने राजन् विद्धि मां कृतनिश्चयं २५ त्यक्तुं नार्हसि मां विदिशानगरयोः
२३ अक्षयैः ऋषिभिः अतिचीरजीविभिर्वसिष्ठाद्यैः

रा॰उ॰९ वीर भक्तेन त्व विशेषतः शत्रुघ्नस्य दृढां बुद्धिं विज्ञाय रघुनंदनः २६ सज्जी भवतु
४० मध्यान्हे भवानित्यब्रवीद्वचः अथ क्षणात्समुत्पेतुर्वानराः कामरूपिणः २७
ऋक्षाश्च राक्षसाश्चैव गोपुच्छाश्च सहस्रशः ऋषीणां देवतानां च पुत्रा रामस्य
निर्गमं २८ श्रुत्वा प्रोचू रघुश्रेष्ठं सर्वे वानरराक्षसाः तवानुगमने विद्धि निश्चि
तार्थान् हि नः प्रभो २९ एतस्मिन्नंतरे रामं सुग्रीवोपि महाबलः यथावदभिवा
द्याह राघवं भक्तवत्सलं ३० अभिषिच्यांगदं राज्ये आगतोस्मि महाबलं त
वानुगमने राम विद्धि मां कृतनिश्चयं ३१ श्रुत्वा तेषां दृढं वाक्यं ऋक्षवानररक्ष
सां बिभीषणमुवाचेदं वचनं मृदु सादरं ३२ धरिष्यति धरा यावत्प्रजास्ताव ४०
त्त्वं शाधि मे वचनाद्राक्षसे राज्यं ज्ञापितोसि मम मोपरि ३३ न किंचिदुत्तरं वाच्यं त्व
१ राक्षससंबंधि राज्यं प्रशाधि अतोन्यन्मावदेत्याह शापितोसीति। अन्यवचनोक्तौ मदु
पातकं तवेति भावः।

पामत्प्रियकारणात् एवं बिभीषणं तूक्त्वा हनुमंतमथाब्रवीत् ३४ मारुते त्वं चिरं
जीव मम आज्ञां मा मृषा कृथाः जांबवंतमथ प्राह निष्ठ त्वं द्वापरांतरे ३५ मया सा
र्द्धं भवेद्युद्धं यत्किंचित्कारणांतरे ततस्तान् राघवः प्राह ऋक्षराक्षसवानरान् ३६
सर्वानेव मयासार्द्धं प्रयातेति दयान्वितः ततः प्रभाते रघुवंशनाथो विशालवक्षाः
सितकंजनेत्रः पुरोधसं प्राह वसिष्ठमार्यं यांत्वग्निहोत्राणि पुरो गुरो मे ३७ ततो
=४ महाप्रस्थानोचितं वसिष्ठोपि चकार सर्वं प्रास्थानिकं कर्म महद्विधानात् क्षौमांबरो दर्भपवित्रपा क्षौमेत्यादि रामविशेषणं
णिर्महाप्रयाणाय गृहीतबुद्धिः ३८ निष्क्रम्य रामो नगरात्सिताभ्राच्छशीवया
तः शशिकोटिकांतिः रामस्य सव्येसितपद्महस्ता पद्मा गता पद्मविशालनेत्रा
३९ पार्श्वेथ दक्षेरुणकंजहस्ता श्यामा मायया भूरपि दीप्यमाना शास्त्राणि शा

=२ पद्मा लक्ष्मीः। पूर्वगतापि सीता तत्काले लक्ष्मीरूपेण संनिहिता जातेत्यर्थः।
=१ भूस्तदधिष्ठात्री देवता एवमग्रेपि बोध्यं।

२श्रुतीनांमाताणायत्री

रा・उ・९ स्त्राणिधनुश्चबाणाजग्मुःपुरस्ताद्धृतविग्रहास्ते ४० वेदाश्चसर्वेधृतविग्र
४१ हाश्चययुश्चसर्वेमुनयश्चदिव्याः मांताश्रुतीनांप्रणवेनसाध्वीययौहरिंव्या
हृतिभिःसमेता ४१ गच्छंतमेवानुगताजनास्तेसपुत्रदाराःसहबंधुवर्गैः।
१अनावृतद्वारापवर्गतुल्यंव्रजंतंराममनुययुः। अनावृतद्वारमिवापवर्गंरामंव्रजंतंययुरात्तकामाः ४२ सांतःपुरःसानुचरः
सभार्यःशत्रुघ्नयुक्तोभरतोनुपायात् गच्छंतमालोक्यरमासमेतंश्रीराघवं
पौरजनाःसमस्ताः ४३ सबालवृद्धाश्चययुर्द्विजाग्र्याःसामात्यवर्गाश्चस
मंत्रिणोययुः सर्वेगताःक्षत्रमुखाःप्रहृष्टावैश्याश्चशूद्राश्चतथापरेच ४४
सुग्रीवमुख्याहरिपुंगवाश्चस्नाताविशुद्धाःशुभनादयुक्ताः नकश्चिदासीद्दु ४१
२क्षत्रंक्षत्रिणःमुखंमुख्याःअग्रेसरायेषांतादृशोवैश्यादयः

वदुःखमुक्तोदीनोथवाबाह्यमुखेषुसक्तः ४५ आनंदरूपानुगताविरक्तापद्यु
श्चरामंपश्चुभृत्यवर्गैः भूतान्यदृश्यानिचयानितत्रयेप्राणिनःस्थावरजंग
माश्च ४६ साक्षात्परात्मानमनंतशक्तिंजग्मुर्विरक्ताःपरमेकमीशं नासी
द्योध्यानगरेतुजंतुःकश्चिन्नदाराममनानयातः ४७ शून्यंबभूवाखिलमेव
तत्रपुरंगतेराजनिरामचंद्रे ततोतिदूरंनगरात्सगत्वादृष्ट्वानदींतां हरिनेत्रजा सरयूंनामसंज्ञेयं
तां ४८ ततेदरामःस्मितपावनोतोददर्शचाशेषमिदंदृदिस्थं अथागतस्त
त्रपितामहोमहान्देवाश्चसर्वेऋषयश्चसिद्धाः ४९ विमानकोटीभिरपार
पारंसमावृतंखंसुरसेविताभिः रविप्रकाशाभिरभिस्फुरत्खंज्योतिर्मयंतत्रन
भोबभूव ५० स्वयंप्रकाशैर्महतांमहद्भिःसमावृतंपुण्यकृतांवरिष्ठैः ववुश्च
= २ अपारपारं अवधिरूपपारद्वयहीनं अपि खं विमानावृतमासीत्। ज्योतिर्मयंनक्षत्रगणप्रचुरमिव।

=१ स्मितपावनं विराड्रूपमात्मनोयनसः ३ अशेषजगद्दिस्थंदर्शआत्मानंविराड्रूपंस्म तथानिस्थ्यः।

=२ अलोपर्यगच्छदित्यर्थः। तत्र हेतुगर्भविशेषणमनंतशक्तिरिति।

रा०३०९ गताश्च सुगंधवंतो ववर्ष वृष्टिः कुसुमावलीनां ५१ उपस्थिते देवमृदंगना
४२ देगायत्सु विद्याधरकिन्नरेषु रामस्तु पद्भ्यां सरयूजलं स स्पृष्ट्वा परिक्राम
दनंतशक्तिः ५२ ब्रह्मा तदा प्राह कृतांजलिस्तं रामं परात्मन्परमेश्वरस्त्वं।
विष्णुः सदानंदमयोसि पूर्णो जानासि तत्त्वं निजमेव धामैकं ५३ तथापि दासस्य
ममाखिलेशाकृतं वचो मत्कृपरोसि विद्वन् त्वं भ्रातृभिर्वैष्णवमेकमाद्यं प्रवि
यदितीयस्तदर्थः शद्देहं परिपाहि देवान् ५४ यं द्वापरो वा यदि रोचते तं प्रविश्य देहं परिपाहि
नस्त्वं त्वमेव देवाधिपतिश्च विष्णुर्जानंति न त्वां पुरुषाविनामां ५५ सहस्रकृ
त्वस्तु नमो नमस्ते प्रसीद देवेश पुनर्नमस्ते पितामहप्रार्थनया स रामः प्रत्य
त्सु देवेषु महाप्रकाशः ५६ मुहूर्तं श्च वसूंषि दिवौकसां तदा बभूव चक्रादि ४२

=४ एवं विष्णुरूपं त्वां मां विना अन्ये पुरुषा न जानंति।

=२ सीता च पुरैव लक्ष्मीरभवत् सा पितृकाले लक्ष्मीरूपेण संनिहिताऽऽसीदिति शेषः। हि यस्माद्रामो विष्णुरित्यर्थः

पुत्रश्चतुर्भुजः शेषोऽभूद्वेश्वरतल्पभूतः सौमित्रिरत्यद्भुतभोगधारी ५७ ब
भूव तुश्चक्रदरौ च दिव्यौ केकेयिसूनुर्लवणांतकश्च सीता च लक्ष्मीरभव
त्पुरैव रामो हि विष्णुः पुरुषः पुराणः ५८ सहानुजः पूर्वशरीरकेण बभू विष्णुर्देहेन
व तेजोमयदिव्यमूर्तिः विष्णुं समासाद्य सुरेंद्रमुख्या देवाश्च सिद्धा मुनय
श्च यक्षाः ५९ पितामहाद्याः परितः परेशं स्तवैर्गृणंतः परिपूजयंतः आनं
दसंप्लावितपूर्णचित्ता बभूविरे प्राप्तमनोरथास्ते ६० तदाह विष्णुर्द्रुहिणं महा
त्मा एते हि भक्ता मयि चानुरक्ताः यातं दिवं मामनुयांति सर्वे तिर्यक्शरीरा अपि पु
ण्ययुक्ताः ६१ वैकुंठसाम्यं परमं प्रयांतु समाविशंत्वाशु ममाज्ञया ते श्रुत्वा ह
रेर्वाक्यमथाब्रवीत्कः सांतानिकान्यांतु विचित्रभोगान् ६२ लोकान्मदीयोपरि

=२ वैकुंठसमलोकं। स्वार्थे ष्यञ्। आर्षत्वात्। समाविशत्वं प्रवेशयत्वा। सांतानिकाः लोकविशेषाः॥ १ तेषां लोकानामुत्तमं [illegible]

=१ अपिच ये पि मनुष्या लयकाल एव मरणकाल एव न तु ततः प्रागपि कदाचित् तत्राप्यज्ञानतो ऽज्ञानतो वा एव वा एवार्थे । ते तव पवित्रनाम रामेत्येतद्गृणंति ते पि तानेव लोकान्योगप्राप्यान् भजंतु । एतेनाजन्माभ्यस्तयोगोन्तकाले त्वन्नामस्मर्ता च समस्तीति सूचि

रा०उ०९ दीप्यमानांस्त्वद्भावयुक्ताः कृतपुण्यपुंजाः येचापि ते रामपवित्रनाम गृणंति

४३ मर्त्या लयकाल एव ६३ अज्ञानतो वापि भजंतु लोकांस्तानेव योगैरपि चा

धिगम्यान् ततो निरुद्धा हरिराक्षसाद्याः स्पृष्ट्वाजलं त्यक्तकलेवरास्ते ६४

प्रपेदिरे प्राक्तनमेव रूपं यदंशजाता ऋक्षहरीश्वरास्ते प्रभाकरं प्राप हरिप्रवी

रः सुग्रीव आदित्यजवीर्यवत्वात् ६५ ततो विमग्नाः सरयूजले षु नराः प

रित्यज्य मनुष्यदेहं आरुह्य दिव्याभरणा विमानं प्रापुश्च ते सांतनिका

ख्यलोकान् ६६ तिर्यक्प्रजाता अपि राम दृष्ट्वा जले प्रविष्टा दिवमेव याताः ।

दिदृक्षवो जानपदाश्च लोका रामं समालोक्य विमुक्तसंगाः ६७ स्मृत्वा भूत्वेत्यर्थः

हरिं लोकगुरुं परेशं स्पृष्ट्वाजलं स्वर्गमवापुरंजः एतावदेवोत्तरमाह

शीघ्रं

=१ रामायणपाठफलमाह यइति।
=२ अंतर्यामिविधया रघुनाथप्रेरितेन

ग्रंभुः श्रीरामचंद्रस्य कथावशेषं ६८ यः पादमप्यत्र पठेत्स पापाद्विमु
च्यते जन्मसहस्रजातात् दिने दिने पापचयं प्रकुर्वन् पठेन्नरः श्लोकम
पीह भक्त्या ६९ विमुक्तसर्वाघचयः प्रयाति रामस्य सालोक्यमनन्य
लभ्यं आख्यानमेतद्रघुनायकस्य कृतं पुरा राघवचोदितेन ७०
महेश्वरेणास्तभविष्यदर्थं श्रुत्वा तु रामः परितोषमेति रामायणं काव्य
=४ वाचकश्रोत्रोरनंतपुण्यदमित्यर्थः। मनंतपुण्यं श्रीशंकरेणाभिहितं भवान्यै ७१ भक्त्या पठेद्यः शृणुयात्स
पापैर्विमुच्यते जन्मशतोद्भवैश्च अध्यात्मरामं पठतश्च नित्यं श्रोतु
श्च भक्त्या लिखतश्च रामः ७२ अतिप्रसन्नश्च सदा समीपे सीतास भूतेतिशेषः।
मेतः श्रियमातनोति ७३ रामायणं जनमनोहरमादिकाव्यं ब्रह्मा

=५ अस्तः संबद्धो भविष्यदर्थो यत्र तत्तदाख्यानं। =३ तत्परघटितं अध्यात्मरामायणाख्यं पुराणमित्यर्थः।

रा·उ·९ दिभिः सुरवरैरपि संस्तुतं च श्रद्धान्वितः पठति यः शृणुयात्तु नित्यं विष्णोः
४४ प्रयाति सदनं स विशुद्धदेहः ७४ ॥ इति श्रीमदध्यात्मरामायणे उमा
महेश्वरसंवादे उत्तरकांडे नवमः सर्गः ९ उत्तरकांड संपूर्णमस्तु श्री
रामचंद्रार्पणमस्तु शुभं भवतु अध्यात्मोत्तरकांडे सर्गाग्रह सं
ख्यया परिक्षिप्ताः ऋतुशत संख्याः श्लोकाः पुराणसंख्याश्च पुरहरेणोक्ताः
॥ पार्वत्यै परमेश्वरेण गदितेऽध्यात्मरामायणे कांडैः सप्तभिरन्विते
ति शुभदे सर्गाश्चतुःषष्टिकाः ॥ श्लोकानां तु शतद्वयेन सहितान्यु
क्तानि चत्वारि साहस्राण्येव समासतः श्रुतिशते सूक्तानि तत्वा ४४

रा॰उ॰९ र्थतः १ ॥ ॥इतिअध्यात्मरामायण उत्तरकांड समाप्तः॥श्री
४५ रामजयरामजयजयरामतुसाक्षः ॥श्रीरस्तु॥ रामचंद्रप्रभुः॥
॥ ७ ॥ ७ ॥ ७ ७॥ ॥७

श्रीगणेशायनमः ॥ अथदानमंत्रः ॥ कुरुक्षेत्रमयंदेशः कालपर्वद्विजोहरिः ॥ पृथ्वी
समभिदंदानंगृहाणपुरुषोत्तम ॥ १ ॥ मलमासेतुसंप्राप्तेगुडसर्पिर्युतानिच ॥
त्रयस्त्रिंशदपूपानिदातव्यानिदिनेदिने ॥ २ ॥ साज्यानिगुडमिश्रानिअधि
मासेनृपोत्तम ॥ उद्दिश्यापूपदानेनपृथ्वीदानफलंलभेत् ॥ ३ ॥ त्रयस्त्रिंशदपू
पानिकांस्यपात्रेनिधायच ॥ सघृतंसहिरण्यंचप्रतिगृह्णजनार्दन ॥ ४ ॥
मलानांचविशुद्ध्यर्थंपापप्रशमनायच ॥ पुत्रपौत्राभिवृद्ध्यर्थंतवदास्या
मिभास्कर ॥ ५ ॥ मलमासस्तुमासानांमलिनःपापसंभवः ॥ तस्यपाप
विशुद्ध्यर्थंमलमासव्रतंकुरु ॥ ६ ॥ तिलाःकाश्यपसंभूतास्तिलाःपापह

१ रस्मृताः॥ तिलपात्रप्रदानेन मतः शांतिं प्रयच्छमे ॥ ५॥ देवागोरद्विजानांवा
दीपं दत्वा चतुष्पथे ॥ मेघाविज्ञानसंपंनं चक्षुष्मान्भ्यसदाभवेत्॥ ६॥ व्यती
पातनमस्तेस्तु सोमसूर्यसुतप्रभो॥ यद्धनादि हृतं किंचित्तद्रक्षयमिहस्तु
मे ॥ ७॥ धान्यं करोषि दातारं इह लोके परत्र च॥ प्राणिनां जीवनोपायमतः
शांतिं प्रयच्छमे॥ ८॥ गुंजामात्रमिदं स्वर्णं हेम वि प्रकरार्पितं॥ हेमाद्री
सदृसं दानमतः शांतिं प्रयच्छमे॥ एष कुंभघटो दत्तो ब्रह्मविष्णु शिवात्म
कः॥ अस्य प्रदानात्सकला मम संतु मनोरथाः॥ गंधोदकयवैर्मिश्रैः
सांनं कुंभं फलान्वितं॥ माधवः संप्रदास्यामि अक्षय्यमुपतिष्ठतु॥ ॥ २॥

प्रयाणनक्षत्रे॥ मघास्वातीपुष्य ०१ मघार्मृगशि० २ अ० यो० आदित्यहस्ते० ३ उत्पातयोग० भानुर्वि शाखाशशिपूर्वषाढा भौमे धनिष्ठा बुधरेवतीषु॥ बृहस्पतौ रोहिणि शुक्रपुष्ये मंदोत्तराणां मुत्पातयो ग॥ ४॥ द० बुधतृतीया कुज ०॥ ५॥ मृ०॥ त्यजरवि मनु०॥ ६॥ चंद्रपा० मेषे चसिंहे धे०॥ ७ फ० सन्मुखो अ०॥ ८॥ सन्मुखचंद्र असता दोषपरिहारः॥ करण भगणदोषं वारसंक्रांतिद्रोषं तिथिकुलिक दोषयो गयामार्धदोषं॥ शनि कुजरवि दोषं राहुकेत्वादिदोषं हरति सकृदु० खं चंद्रमा सन्मुखं स्यात्॥ ९॥ वारश्र ल वर्ज॥ न पूर्वे शनि सोमेच न गुरुर्दक्षिणामुखः॥ न प आज्ञा नुशुक्रस्य न उत्तरे बुधमंगलौ॥ १०॥ इंदुं दधि यमे तैलं वारुणं गुडमेवच॥ उत्तरे क्षीरभो ज्यंच वारदोषो न विद्यते॥ ११ उक्तवार॥ अंगार पूर्वे गमने च लाभं सोमार्कजा दक्षिणमर्थलाभं॥ बुधौ गुरो पश्चिम कार्य सिद्धिं शुक्रे रविन्यो त्तर कार्यलाभं॥ १२ घबाड सूर्यादिनित्यनक्षत्रं त्रिगुणं तिथिमिश्रितं॥ सप्तभिस्तु हरेद्भागं त्रीणि शेषं घबाडकं॥ १३ शिवरयो० सूर्यादिनित्यनक्षत्रं तिथिवारेण मिश्रितं॥ नवभा गं से प्रशेषं हि वरं सिद्धिदायकं॥ १४॥ अढकभ्रमण सूर्यादि गण्यते चंद्रे सप्तभिर्भागमाहरेत्॥ अवि दु कभ्रमणं चैव बहुसप्तमहताढकं॥ १५॥ प्रथमं पंच न स्वामी अढको नास्ति निश्चयः॥ अढकं तु न गंतव्यं गंत व्यं भ्रमणमेवच॥ तृतीये धन लाभश्च षष्ठे कार्य विना शनं॥ १६ मद्रा० बुध तृतीया द० १७ राशिस्वामि०॥ मेषस्यार्कः सिंह कन्या गो हरिणां मंदः द्वंद्व स्ये गुरौरा मृग

१ रस्मृताः॥ तिलपात्रप्रदानेन मतः शांतिं प्रयच्छमे ॥५॥ देवागोरद्विजानांवा
दापंदत्वाचतुष्पदे॥ मेघाविज्ञानसंपंनं चक्षुष्माश्चसदाभवेत्॥२॥ व्यती
पातनमस्तेस्तुसोमसूर्यसुतप्रभो॥ यद्धनादिहृतं किंचिद्दरक्षयमिहस्तु
मे॥४॥ धान्यंकरोषिदातारं इहलोके परत्रच॥ प्राणिनांजीवनोपायमतः
शांतिंप्रयच्छमे॥ ५॥ गुंजामात्रमिदं स्वर्णहेम विभकरार्पितं॥ हेमाद्री
सदसंदानमतः शांतिंप्रयच्छमे॥ एषकुंभघटोदत्तोत्रह्माविष्णुशिवात्म
कः॥ अस्यप्रदानात्सकलाममसंतु मनोरथाः॥ गंधोदकयवैर्मिश्रैः
सांनंकुंभंफलान्वितं॥ माधवः संप्रदास्यामिअक्षय्यमुपतिष्ठतु॥ ॥ २॥

स्यकर्के सौम्येतौलिकुंभस्यजीवेस्चापाद्यंतेभार्गव:
कालवार:॥१८ मासंचरत्यर्कबुधोभृगुश्चमासा।१९
द्वादशाष्टमज्ञानरङोशनिरं॥२०॥ वेसाष्ट्वादशे
कृष्णेशक्लेदै॰२१॥ अंधकंतदनुमंदलोचनं॰२२
अंधेचलमतेशीघ्रंमंदेचा॥२३ तिथिप्रहरसंपुकं
२४॥ एकेनतत्रसंत्जप्प॰२५॥ मार्जारयुत्थंकं॰
२५॥ कंन्यागो:वृर्णकुंभं॰२६ राशीचेस्वामी१२
मेषवृश्चिकयोर्भौम: शुक्रोवृषतुलाधिप:॥क
न्यामिथुनयो:सौम्यगुरुधनमीनयो:॥क
र्कस्यैवतुचंद्रमा:सिंहस्याधिपति:सूर्य:कथितो
गणकै:क्रमात्॥

[OrderDescription]
,CREATED=06.02.20 15:59
,TRANSFERRED=2020/02/06 at 16:09:08
,PAGES=98
,TYPE=STD
,NAME=S0002759
,Book Name=M-2503-RAMAYAN UTTARKAND
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF

FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF

FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF

FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,